अधिष्ठानं तथा कर्त्ता करणञ्च पृथग्विधम्। विविधाश्च पृथक् चेष्टा दैवं चैवात्र पञ्चमम्। शरीरवाङ्मनोभिर्यत् कर्म प्रारभते नरः। न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः। तत्रैवं सति कर्त्तारमात्मानं केवलन्तु यः। पश्यत्यकृतबुद्धित्वान्न पश्यति स दुर्मतिः। यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते। हत्वापि स इमाल्लोँकान् न हन्ति न निबध्यते। ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना। करणं कर्म कर्त्तेति त्रिविधः कर्मसंग्रहः। ज्ञानं कर्म च कर्त्ता च त्रिधैव गुणभेदतः। प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि। सर्वभूतेषु येनैकं भावमव्ययमीक्षते। अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्। पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान्। वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम्। यत्तु कृत्स्नवदेकस्मिन् कार्य्ये सक्तमहैतुकम्। अतत्त्वार्थवदल्पञ्च तत्तामसमिति स्मृतम्। नियतं सङ्गरहितमरागद्वेषतः कृतम्। अफलप्रेप्सुना कर्म यत्तत् सात्त्विकमुच्यते। यत्तु कामेप्सुना कर्म साहङ्कारेण वा पुनः। क्रियते बहुलायासं तद्राजसमुदाहृतम्। अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम्। मोहादारभ्यते कर्म यत्तत्तामसमुच्यते। मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः। सिद्ध्यसिद्ध्योर्निर्विकारः कर्त्ता सात्त्विक उच्यते। रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः। हर्षशोकान्वितः कर्त्ता राजसः परिकीर्त्तितः। अयुक्तः प्राकृतः स्तब्धः शठो नैकृतिकोऽलसः। विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते। बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु। प्रोच्यमानमशेषेण पृथक्त्वेन धनञ्जय!। प्रवृत्तिञ्च निवृत्तिञ्च कार्य्याकार्य्ये भयाभये। बन्धं मोक्षञ्च या वेत्ति बुद्धिः सा पार्थ! सात्त्विकी। यया धर्ममधर्मञ्च कार्य्यञ्चाकार्य्यमेव च। अयथावत् प्रजानाति बुद्धिः सा पार्थ! राजसी। अधर्मं धर्ममिति या मन्यते तमसावृता। सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ! तामसी। धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः। योगेनाव्यभिचारिण्या धृतिः सा पार्थ! सात्त्विकी। यया तु धर्मकामार्थान् धृत्या धारयतेऽर्जुन!। प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ! राजसी। यया स्वप्नं भयं शोकं विषादं मदमेव च। न विमुञ्चति दुर्मेधा धृतिः सा पार्थ! तामसी। सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ!। अभ्यासाद्रमते यत्र दुःखान्तञ्च निगच्छति। यत्तदग्रे विषमिव परिणामेऽमृतोपमम्। तत् सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम्। विषयेन्द्रियसंयोगात् यत्तदग्रेऽमृतोपमम्। परिणामे विषमिव तत् सुखं राजसं स्मृतम्। यदग्रे चानुबन्धे च सुखं मोहनमात्मनः। निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम्। न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः। सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः” १८अ०। त्रिविधार्थश्च विष्णूक्तोऽर्थशब्दे ३६७ पृ० उक्तः। अन्यस्य त्रैविध्यं यथायथं यथास्थाने उक्तं वक्ष्यते च। उत्पातशब्दे उत्पातत्रैविध्यमुक्तम्। तस्य भावः ष्यञ्। त्रैविध्य त्रिप्रकारत्वे “एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते” भाषा०। “त्रैविध्यादियमर्थानां प्रत्येकं त्रिविधा मता” सा० द०।

**त्रिविष्टप** न० विशन्त्यस्मिन् सुकृतिनः विश—कपन् तुट् षत्वञ्च। “विटपविष्टपविशिपोलपाः” उणा० उज्ज्वलदत्तेन विष्टपेत्यत्र पिष्टपेति पठितम्। अन्ये तत्र दन्त्योष्ठ्यादितया पेठुः। “यत्र अग्नस्य विष्टपमित्यादिप्रयोगात् “विष्टपं भुवनं जगत्” अमरग्रन्थे विष्टपेति पाठस्य क्षीरस्वामिप्रभृतिसम्मतत्वाच्च। तृतीयं विष्टपम् वृत्तौ त्रिभागवत् संख्याशब्दस्य पूरणार्थत्वम्। १स्वर्गे अमरटीकायां स्वामी। “त्रिविष्टपस्येव पतिं जयन्तः” रघुः। “स्वर्गं त्रिविष्टपं प्राप्य धर्मराजो युधिष्ठिरः” भा० स्व० १अ०। समा० द्वि०। २त्रिभुवने न०

**त्रिविष्टपसद्** पु० त्रिविष्टपे स्वर्गे सीदति सद—क्विप्। देवे हला०।

**त्रिविष्टब्ध** न० त्रीणि विष्टब्धानि यत्र। त्रिदण्डरूपे अवष्टम्भतये “य इमां कुण्डिकां भिन्द्यात्त्रिविष्टब्धं च यो हरेत्। वासश्चापहरेत् तस्मिन् कथं ते मानसं भवेत्”। “त्रयीञ्च नाम वार्त्ताञ्च त्यक्त्वा पुत्रान् व्रजन्ति ये। त्रिविष्टब्धञ्च वासश्च प्रतिगृह्णन्त्यबुद्धयः” भा० शा० १८ अ०।

**त्रिविस्त** त्रि० त्रीणि विस्तानि स्वर्णकर्षमूल्यान्यर्हति ठक् तस्य वा लुक्। स्वर्णकर्षत्रयमूल्यार्हे। लुगभावे त्रैविस्तिक तत्रार्थे त्रि०।

**त्रिविस्तीर्ण** पु० त्रिभिः विस्तीर्णः। शुभलक्षणभेदान्विते पुरुषे। “त्रिपृथुलघुगम्भीरो द्वात्रिंशल्लक्षणान्वित” इत्युपक्रमे “ललाटकटिवक्षोभिस्त्रिविस्तीर्णो यथाह्लादौ। सर्वतेजोऽतितिगैश्वर्य्यं तथा प्राप्स्यति नान्यथा” काशी० ११अ०। त्रिपृथुशब्दोऽप्यत्र इ० स० ६८ अ० तु “उरो